# श्री सोमनाथसंस्कृत-युनिवर्सिटी, वेरावलम्
# सत्रान्तपरीक्षा, अक्तुबर - 2019

| | | |
|---|---|---|
| **कक्षा –** शास्त्री-**3** | **सत्रम् – 5** | **गुणाः - 70** |
| **विषयः –** धर्मशास्त्रम् | **प्रश्नपत्रम् - 6 - CC - 3.5.10** | समयः- 3 तः 6 |
| **दिनाङ्कः- 15/10/2019** | **सन्दर्भग्रन्थः –** मनुस्मृतिः (9/10 अध्यायः) | |

**( प्रथमान्वितिः - युनिट-1 )**

**प्र-1 द्वयोः ससन्दर्भं व्याख्या कार्या ।** **10**

1. इमं हि सर्ववर्णानां पश्यन्तो धर्ममुत्तमम् ।
   यतन्ते रक्षितुं भार्यां भर्तारो दुर्बला अपि ।।
2. प्रेषितो धर्मकामार्थं प्रतीक्ष्योऽष्टौनरः समाः ।
   विद्यार्थं षड् यशोऽर्थं वा कामार्थं त्रींस्तुवत्सरान् ।।
3. दौहित्रो ह्यखिलं रिक्थमपुत्रस्य पितुर्हरेत् ।
   स एव दद्याद् द्वौ पिण्डौ पित्रे मातामहाय च ।।

**प्र-2 एकस्य सविस्तरं वर्णनं कुरुत ।** **10**

1. स्त्रीधर्मं विलिख्य कामतो गमनस्य निषेधं ग्रन्थोक्तरीत्या लिखत ।
2. स्वयंवरकालम् उल्लिख्य कन्यावरयोः वयोनियमान् वर्णयत ।

**( द्वितीयान्वितिः - युनिट-2 )**

**प्र-3 द्वयोः श्लोकयोः ससन्दर्भं व्याख्या कार्या ।** **10**

1. स्वक्षेत्रे संस्कृतायां तु स्वमुत्पादयेद्धियम् ।
   तमौरसं विजानीयाद् पुत्रं प्रथमकल्पितम् ।।
2. ईशो दण्डस्य वरुणो राज्ञां दण्डधरो हि सः ।
   ईशः सर्वस्य जगतो ब्राह्मणो वेदपारगः ।।
3. अद्भ्योऽग्निर्ब्रह्मतः क्षत्रमश्मनो लोहमुत्थितम् ।
   तेषां सर्वत्रगं तेजः स्वासु योनिषु शाम्यति ।।

**प्र-4 एकस्य ग्रन्थोक्तरीत्या विवेचनं कुरुत ।** **10**

1. द्यूतसमाह्वयं विलिख्य पाषण्डादीनां देशात् निर्वासनं वर्णयत ।
2. ग्रन्थोक्तदिशा विविधान् दण्डान् प्रतिपादयत ।

**( तृतीयान्वितिः - युनिट-3 )**

**प्र-5 द्वयोः श्लोकयोः ससन्दर्भं व्याख्या कार्या ।** **10**

1. स्त्रीध्वनन्तरजातासु द्विजैरुत्पादितान् सुतान् ।
   सदृशानेव तानाहुर् मातृदोषविगर्हितान् ।।

2. तपोबीजप्रभावैस्तु ते गच्छन्ति युगे युगे ।
उत्कर्षं चाऽपकर्षं च मनुष्येष्विवजन्मतः ।।

3. स्वधर्मो विजयस्तस्य नाऽहवे स्यात् पराङ्गमुखः ।
शस्त्रेण वैश्यान् रक्षित्वा धर्म्यमाहारयेद्बलिम् ।।

**प्र-6 एकस्य सविस्तरं वर्णनं कुरुत । 10**

1. मनुस्मृतिरीत्या ब्राह्मणस्य षट्कर्माणि लिखित्वा तस्य जीविकां प्रतिपादयत ।
2. दश जीवनहेतूनां सविस्तरं वर्णनं कुरुत ।

**प्र-7 दशानां लघूत्तराणि लिखत । 10**

1. स्त्रियं स्थावरेऽवस्थायां के रक्षन्ति
2. जातकर्मादिक्रिया कासां मन्त्रैर्न भवति
3. पुमान् किं भूतः स्मृतः
4. इयं भूमिः भूतानां किम् उच्यते
5. किमर्थं ब्रह्मणा स्त्रियः सृष्टाः
6. पुन्नाम्नो नरकाद् पितरं कः त्रायते
7. कति पुत्राः दायादाबान्धावाश्च कथ्यन्ते
8. औरसक्षेत्रजौ पुत्रौ कस्य भागिनौ
9. मातापितृभ्याम् उत्सृष्टः किं कथ्यते
10. मनुस्मृतेः दशमेऽध्याये कति श्लोकाः सन्ति
11. सर्वस्य जगतः ईशः कः
12. कीदृशो राजा त्रेतायुग-नाम्ना कथ्यते
13. व्रात्याद् ब्राह्मणाद् ब्राह्मण्यां को जायते
14. अग्रजन्मनोब्राह्मणस्य षट्कर्माणि कानि
15. ब्राह्मणात् क्षत्रियं प्रति कति धर्माः निवर्तन्ते ते च के

*******************